# ॥ શ્રીછિન્નમસ્તાહૃદયમ્ ॥

.. shrIChinnamastAhRidayam ..

sanskritdocuments.org

May 21, 2017

# .. shrIChinnamastAhRidayam ..

# ॥ શ્રીછિન્નમસ્તાહૃદયમ્ ॥

## Sanskrit Document Information

Text title : chhinnamastAhradayam

File name : chhinnamastaahridayam.itx

Category : hRidaya

Location : doc_devii

Author : Traditional

Language : Sanskrit

Subject : philosophy/hinduism/religion

Transliterated by : Ravin Bhalekar ravibhalekar at hotmail.com

Proofread by : Ravin Bhalekar ravibhalekar at hotmail.com

Description-comments : shrInandyAvarte mahAdevapArvatIsa.nvAde

Latest update : August 11, 2006

Send corrections to : Sanskrit@cheerful.com

Site access : http://sanskritdocuments.org

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

May 21, 2017

*sanskritdocuments.org*

# ॥ શ્રીછિન્નમસ્તાહૃદયમ્ ॥

શ્રીગણેશાય નમઃ ।
શ્રીપાર્વત્યુવાચ ।
શ્રુતં પૂજાદિકં સમ્યગ્ભવદ્વક્ત્રાબ્જનિઃસૃતમ્ ।
હૃદયં છિન્નમસ્તાયાઃ શ્રોતુમિચ્છામિ સામ્પ્રતમ્ ॥ ૧॥

ૐ મહાદેવ ઉવાચ ।
નાદ્યાવધિ મયા પ્રોક્તં કસ્યાપિ પ્રાણવલ્લભે ।
યત્વયા પરિપૃષ્ટોઽહં વક્ષ્યે પ્રીત્યૈ તવ પ્રિયે ॥ ૨॥

ૐ અસ્ય શ્રીછિન્નમસ્તાહૃદયસ્તોત્રમન્ત્રસ્ય ભૈરવ ઋષિઃ ,
સમ્રાટ્ છન્દઃ , છિન્નમસ્તા દેવતા , હૂં બીજમ્ ,
ૐ શક્તિઃ , હ્રીં કીલકં , શત્રુક્ષયકરણાર્થે પાઠે વિનિયોગઃ ॥

ૐ ભૈરવઋષયે નમઃ શિરસિ ।
ૐ સમ્રાટ્છન્દસે નમો મુખે ।
ૐ છિન્નમસ્તાદેવતાયૈ નમો હૃદિ ।
ૐ હૂં બીજાય નમો ગુહ્યે ।
ૐ ૐ શક્તયે નમઃ પાદયોઃ ।
ૐ હ્રીં કીલકાય નમો નાભૌ ।
ૐ વિનિયોગાય નમઃ સર્વાઙ્ગે ।
ઇતિ ઋષ્યાદિન્યાસઃ ।
ૐ ૐ અઙ્ગુષ્ઠાભ્યાં નમઃ ।
ૐ હૂં તર્જનીભ્યાં નમઃ ।
ૐ હ્રીં મધ્યમાભ્યાં નમઃ ।
ૐ ઐં અનામિકાભ્યાં નમઃ ।
ૐ ક્લીં કનિષ્ઠિકાભ્યાં નમઃ ।
ૐ હૂં કરતલકરપૃષ્ઠાભ્યાં નમઃ ।
ઇતિ કરન્યાસઃ ।
ૐ ૐ હૃદયાય નમઃ ।
ૐ હૂં શિરસે સ્વાહા ।
ૐ હ્રીં શિખાયૈ વષટ્ ।

ૐ ઐં કવચાય હુમ્ ।
ૐ ક્લીં નેત્રત્રયાય વૌષટ્ ।
ૐ હૂં અસ્ત્રાય ફટ્ ।
ઇતિ હૃદયાદિષડઙ્ગન્યાસઃ ।
રક્તાભાં રક્તકેશીં કરકમલલસત્કર્ત્રિકાં કાલકાન્તિં
વિચ્છિન્નાત્મીયમુણ્ડાસૃગરુણબહુલોદગ્રધારાં પિબન્તીમ્ ।
વિઘ્નાભ્રૌઘપ્રચણ્ડશ્વસનસમનિભાં સેવિતાં સિદ્ધસઙ્ઘૈઃ
પદ્માક્ષીં છિન્નમસ્તાં છલકરદિતિજચ્છેદિનીં સંસ્મરામિ ॥

ઇતિ ધ્યાનમ્ ।
વન્દેઽહં છિન્નમસ્તાં તાં છિન્નમુણ્ડધરાં પરામ્ ।
છિન્નગ્રીવોચ્છટાચ્છન્નાં ક્ષૌમવસ્ત્રપરિચ્છદામ્ ॥ ૨॥

સર્વદા સુરસઙ્ઘેન સેવિતાઙ્ઘ્રિસરોરુહામ્ ।
સેવે સકલસમ્પત્ત્યૈ છિન્નમસ્તાં શુભપ્રદામ્ ॥ ૩॥

યજ્ઞાનાં યોગયજ્ઞાય યા તુ જાતા યુગે યુગે ।
દાનવાન્તકરીં દેવીં છિન્નમસ્તાં ભજામિ તામ્ ॥ ૪॥

વૈરોચનીં વરારોહાં વામદેવવિવર્દ્ધિતામ્ ।
કોટિસૂર્યપ્રભાં વન્દે વિદ્યુદ્વર્ણાક્ષિમણ્ડિતામ્ ॥ ૫॥

નિજકણ્ઠોચ્છલદ્રક્તધારયા યા મુહુર્મુહુઃ ।
યોગિનીસ્તર્પયન્ત્યુગ્રા તસ્યાશ્ચરણમાશ્રયે ॥ ૬॥

હૂમિત્યેકાક્ષરં મન્ત્રં યદીયં યુક્તમાનસઃ ।
યો જપેત્તસ્ય વિદ્વેષી ભસ્મતાં યાતિ તાં ભજે ॥ ૭॥

હૂં સ્વાહેતિ મનું સમ્યગ્યઃ સ્મરત્યર્તિમાન્નરઃ ।
છિનત્તિ ચ્છિન્નમસ્તાયા તસ્ય બાધાં નમામિ તામ્ ॥ ૮॥

યસ્યાઃ કટાક્ષમાત્રેણ ક્રૂરભૂતાદયો દ્રુતમ્ ।
દૂરતઃ સમ્પલાયન્તે ચ્છિન્નમસ્તાં ભજામિ તામ્ ॥ ૯॥

ક્ષિતિતલપરિરક્ષાક્ષાન્તરોષા સુદક્ષા
છલયુતખલકક્ષાચ્છેદને ક્ષાન્તિલક્ષ્યા ।
ક્ષિતિદિતિજસુપક્ષા ક્ષોણિપાક્ષય્યશિક્ષા

જયતુ જયતુ ચાક્ષા ચ્છિન્નમસ્તારિભક્ષા ॥ ૧૦॥

કલિકલુષકલાનાં કર્ત્તને કર્ત્રિહસ્તા
સુરકુવલયકાશા મન્દભાનુપ્રકાશા ।
અસુરકુલકલાપત્રાસિકાऽમ્લાનમૂર્તિ
જયતુ જયતુ કાલી ચ્છિન્નમસ્તા કરાલી ॥ ૧૧॥

ભુવનભરણભૂરિભ્રાજમાનાનુભાવા
ભવભવવિભવાનાં ભારણોદ્ભાતભૂતિઃ ।
દ્વિજકુલકમલાનાં ભાસિની ભાનુમૂર્તિ
ભવતુ ભવતુ વાણી ચ્છિન્નમસ્તા ભવાની ॥ ૧૨॥

મમ રિપુગણમાશુ ચ્છેત્તુમુગ્રં કૃપાણં
સપદિ જનનિ તીક્ષ્ણં છિન્નમુણ્ડં ગૃહાણ ।
ભવતુ તવ યશોऽલં છિન્ધિ શત્રૂન્ખલાન્મે
મમ ચ પરિદિશેષ્ટં છિન્નમસ્તે ક્ષમસ્વ ॥ ૧૩॥

છિન્નગ્રીવા છિન્નમસ્તા છિન્નમુણ્ડધરાऽક્ષતા ।
ક્ષોદક્ષેમકરી સ્વક્ષા ક્ષોણીશાચ્છાદનક્ષમા ॥ ૧૪॥

વૈરોચની વરારોહા બલિદાનપ્રહર્ષિતા ।
બલિપૂજિતપાદાબ્જા વાસુદેવપ્રપૂજિતા ॥ ૧૫॥

ઇતિ દ્વાદશનામાનિ ચ્છિન્નમસ્તાપ્રિયાણિ યઃ ।
સ્મરેત્પ્રાતઃ સમુત્થાય તસ્ય નશ્યન્તિ શત્રવઃ ॥ ૧૬॥

યાં સ્મૃત્વા સન્તિ સદ્યઃ સકલસુરગણાઃ સર્વદા સમ્પદાઢ્યાઃ
શત્રૂણાં સઙ્ઘમાહત્ય વિશદવદનાઃ સ્વસ્થચિત્તાઃ શ્રયન્તિ ।
તસ્યાઃ સઙ્કલ્પવન્તઃ સરસિજચરણાં સતતં સંશ્રયન્તિ સાऽऽદ્યા
શ્રીશાદિસેવ્યા સુફલતુ સુતરં છિન્નમસ્તા પ્રશસ્તા ॥ ૧૭॥

ઇદં હૃદયમજ્ઞાત્વા હન્તુમિચ્છતિ યો દ્વિષમ્ ।
કથં તસ્યાચિરં શત્રુર્નાશમેષ્યતિ પાર્વતિ ॥ ૧૮॥

યદીચ્છેન્નાશનં શત્રોઃ શીઘ્રમેતત્પઠેન્નરઃ ।
છિન્નમસ્તા પ્રસન્ના હિ દદાતિ ફલમીપ્સિતમ્ ॥ ૧૯॥

શત્રુપ્રશમનં પુણ્યં સમીપ્સિતફલપ્રદમ્ ।

આયુરારોગ્યદં ચૈવ પઠતાં પુણ્યસાધનમ્ ॥ ૨૦॥

॥ ઇતિ શ્રીનન્દ્યાવર્તે મહાદેવપાર્વતીસંવાદે
શ્રીછિન્નમસ્તાહૃદયસ્તોત્રં સમ્પૂર્ણમ્ ॥

Encoded and Proofread by Ravin Bhalekar ravibhalekar@hotmail.com

.. shrIChinnamastAhRidayam ..
was typeset using XƎLATEX 0.99996
on May 21, 2017

Please send corrections to *sanskrit@cheerful.com*